दिवसे ब्राह्मणान् भोजयेत् ततः सम्पद्यते शुभम् ।

पञ्चमे दिवसे मासे वर्षे वा गृह्णाति कटपूतना नाम मातृका । तया गृहीतमात्रेण प्रथमं भवति ज्वरः । गात्रमुद्वेजयति स्तन्यं न गृह्णाति मुष्टिं बध्नाति । बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । कुम्भकारचक्रस्य मृत्तिकां गृहीत्वा पुत्तलिकां विधाय गन्धताम्बूलं शुक्लपुष्पं शुक्लौदनं पञ्च ध्वजाः पञ्च प्रदीपाः पञ्चवटकाः ऐशान्यां दिशि बलिर्दातव्यः । शान्त्युदकेन स्नापयेत् । शिवनिर्म्माल्यसर्पनिर्म्मोक गुग्गुलु निम्बपत्रबालकघृतैर्धूपं दद्यात् । ॐ नमो नारायणाय असुकस्य व्याधिं चूर्णय चूर्णय हन हन स्वाहा । चतुर्थे दिवसे ब्राह्मणान् भोजयेत् ततः सम्पद्यते शुभम् ॥ षष्ठे दिवसे मासे वर्षे वा गृह्णाति शकुनिकानाम मातृका तया गृहीतमात्रेण प्रथमं भवति ज्वरः । गात्रभेदं दर्शयति दिवारात्रावुत्थानं भवति । ऊर्द्ध्वं निरीक्षते । बलिं तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । पिष्टकेन पुत्तलिकां कृत्वा शुक्लपीतरक्तपुष्पगन्धताम्बूलानि दश दीपाः । दश पीतध्वजाः दश स्वस्तिकाः दश वटकाः । पौरजम्बुड़िकाः । मत्स्यमांससुरा आग्नेय्यान्दिशि निष्क्रान्ते मध्याह्ने बलिर्दातव्यः । शान्त्युदकेन स्नापयेत् । शिवनिर्म्माल्यरसोनगुग्गुलुसर्पनिर्म्मोकनिम्बपत्रघृतैर्धूपं दद्यात् । ॐ नमो नारायणाय असुकस्य व्याधिं चूर्णय चूर्णय हन हन स्वाहा । चतुर्थे दिवसे ब्राह्मणान् भोजयेत् ततः सम्पद्यते शुभम् ॥

सप्तमे दिवसे मासे वर्षे वा गृह्णाति शुष्करेवती नाम मातृका । तया गृहीतमात्रेण प्रथमं भवति ज्वरः । गात्रमुद्वेजयति मुष्टिं बध्नाति रोदिति । बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । रक्तशुक्लपुष्पं गन्धताम्बूलरक्तौदनं कृशरान्नयोदश स्वस्तिकाः त्रयोदश सष्कुलिका जम्बुड़िका मत्स्यमांससुराः त्रयोदश ध्वजाः पञ्च प्रदीपाः । पश्चिमस्यान्दिशि ग्रामनिष्क्रान्तेऽपराह्ने वृक्षमाश्रित्य बलिर्दातव्यः । शान्त्युदकेन स्नापयेत् । गुग्गुलुमेषशृङ्गसर्षपोशीर बालकघृतैर्धूपन्दद्यात् । ॐ नमो नारायणाय दीप्ततेजसे हन हन मुञ्च मुञ्च स्वाहा ॥ चतुर्थे दिवसे ब्राह्मणान् भोज ेत् ततः सम्पद्यते शुभम् ।

अष्टमे दिवसे मासे वर्षे वा गृह्णाति अर्य्यका नाम मातृका तया गृहीतमात्रेण प्रथमं भवति ज्वरः । शवगन्धः पूतिगन्धश्च जायते । आहारं न गृह्णाति गात्रमुद्वेजयति । बलिन्तस्य प्रवक्ष्याभि ततः सम्पद्यते शुभम् । रक्तपीतध्वजाः चन्दनं पीतपुष्पं सष्कुल्यः पर्पटिका मत्स्यमांससुराः जम्बुड़िकाः प्रत्यूषे बलिन्दद्यात् ॥ ॐ नमो नारायणाय त्रैलोक्यविद्रवणाय चतुर्द्दिशामोक्षणाय व्याधिं हन हन मुञ्च मुञ्च ज्वल ज्वल दह दह ॐ ह्रीं फट् स्वाहा ॥ चतुर्थे दिवसे ब्राह्मणाम् भोजयेत् ततः सम्पद्यते शुभम् ।

नवमे दिवसे मासे वर्षे वा गृह्णाति सूतिका नाम मातृका । तया गृहीतमात्रस्य प्रथमं भवति ज्वरः । नित्यं छर्द्दयति गात्रभेदं दर्शयति मुष्टिं बध्नाति । निद्रातितरा स्यात् बलिन्तस्य प्रवक्ष्यामि येनसम्पद्यते शुभम् । नद्युभयतटमृत्तिकां गृहीत्वा पुत्तलिकां निर्म्माय शुक्लवस्त्रेण वेष्टयेत् । शुक्लपुष्पं शुक्लौदनं गन्धताम्बूलं शुक्लाः त्रयोदश ध्वजाः त्रयोदश प्रदीपाः त्रयोदश स्वस्तिकाः त्रयोदश मत्स्यमांससुराः । उत्तरदिग्विभागे ग्रामनिष्क्राशे बलिं दापयेत् । शान्त्युदकेन स्नापयेत् । गुग्गुलुनिम्बपत्रगोधूमगोशृङ्गश्वेतसर्षपघृतैर्धूपं दद्यात् । ॐ नमो नारायणाय चतुर्भुजाय हन हन मुञ्च मुञ्च स्वाहा । चतुर्थे दिवसे ब्राह्मणान् भोजयेत्ततः सम्पद्यते शुभम् ।

दशमे दिवसे मासे वर्षे वा यदि गृह्णाति निर्ऋता नाम मातृका । तया गृहीतमात्रेण प्रथमं भवति ज्वरः । गात्रमुद्वेजयति चाँत्कारं करोति पुरीषमूत्रञ्च बहु भवेत् । बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । पारावारस्य मृत्तिकया पुत्तलिकां कृत्वा रक्तचन्दनगन्धताम्बूलादिभिर्भूषयित्वा पञ्च वर्णाः पञ्च ध्वजाः पञ्च प्रदीपाः पञ्च स्वस्तिकाः पञ्च पुत्तलिका मत्स्यमांससुराः वायव्यान्दिशि बलिन्दद्यात् । काकविष्ठागोमांसगोशृङ्गरसोनमार्ज्जाररोमनिम्बपत्रघृतैर्धूपयेत् । ॐ नमो नारायणाय चूर्णितहस्ताय हन हन मुञ्च मुञ्च स्वाहा । चतुर्थे दिवसे ब्राह्मणान् ोजयेत्ततः सम्पद्यते शुभम् ॥

एकादशे दिवसे मासे वर्षे वा यदा गृह्णाति पिलिपिच्छिका नाम मातृका । तया गृहीतमात्रस्य प्रथमं भवति ज्वरः । आहारं न गृह्णाति । ऊर्द्ध्वदृष्टिर्भवति गात्रभङ्गश्च भवति चाँत्कारश्च भवति । बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । पिष्टकेन पुत्तलिकां कृत्वा रक्तचन्दनरक्तां तस्या मुखं दुग्धेन सिञ्चेत् पीतपुष्पं गन्धताम्बूलं सप्त प्रदीपा अष्टौ वटका अष्टौ सष्कुलिका अष्टौ पुरिका मत्स्यमांससुराः पूर्व्वस्यान्दिशि बलिर्दातव्यः । शान्त्युदकेन स्नापयेत् । शिवनिर्म्माल्य गुग्गुलु गोशृङ्गसर्पनिर्म्मोकघृतैर्धूपयेत् । ॐ नमो नारायणाय मुञ्च मुञ्च स्वाहा । चतुर्थदिवसे विप्रान् भोजयेत्तेन सम्पद्यते शुभम् ॥

द्वादशे दिवसे मासे वर्षे वा यदा गृह्णाति कामुका नाम मातृका । तया गृहीतमात्र स्यादौ जायते ज्वरः । हसित्वा वदति अङ्गुल्या तर्ज्जयति क्रामति निःश्वसिति । मुहुर्मुहुश्छर्द्दयति । आहारं न करोति । बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । क्षीरेण पुत्तलिकां कृत्वा शुक्लकुसुमं गन्धताम्बूलं शुक्लाः सप्त ध्वजाः । सप्त सष्कुलिकाः ॥ सप्त प्रदीपाः । करम्भेन दधिभक्तेन सर्व्वकर्म्मबलिं दद्यात् शान्त्युदकेन स्नापयेत् । श्वेतसर्षपगुग्गुलुशिवनिर्म्माल्यघृतैर्धूपयेत् । ॐ नमो नारायणाय व्याधिं मुञ्च मुञ्च हन हन स्वाहा । चतुर्थे दिवसे विप्रान् भोजयेत् । ततः सम्पद्यते शुभम् ॥

इति रावणकृतं बालतन्त्रं समाप्तम् ॥

इति वैद्यकचक्रपाणिसंग्रहे बालरोगाधिकारे ॥)

बालचर्य्यः, पुं, (बालस्य बालकस्येव चर्य्या यस्य ।) कार्त्तिकेयः । इति त्रिकाण्डशेषः ॥ बालकस्य चरित्रे, क्ली ॥

बालतनयः, पुं, (बालानि नवोद्गतपत्राणि तनया इव यस्य ।) खदिरवृक्षः । इत्यमरः ।२।४।४६ ॥ (गुणादयोऽस्य खदिरशब्दे ज्ञातव्याः ॥) बालकपुत्त्रस्य ॥

बालतन्त्रं, क्ली, (बालाय बालकरक्षार्थं तन्त्रमुपायः शास्त्रं वा ।) गर्भिणीचर्य्या । तत्पर्य्यायः । कुमारभृत्या २ गर्भिण्यवेक्षणम् ३ । इति त्रिकाण्डशेषः ॥ (अस्य विवरणन्तु सुश्रुते सूत्रस्थाने १ अध्याये । यथा, "शल्यं शालाक्यं कायचिकित्सा भूतविद्या कौमारभृत्यमगदतन्त्रं वाजीकरणतन्त्रमिति ॥" कौमारभृत्यस्य वा बालतन्त्रस्य लक्षणमाह तत्रैव । "कौमारभृत्यं नाम कुमारभरणधात्रीक्षीरदोषसंशोधनार्थं दुष्टस्तन्यग्रहसमुत्थानाञ्च व्याधीनामुपशमनार्थम् ॥" बालतन्त्राणि कानि तान्याह तत्रैव ३ अध्याये ।

"नवग्रहाकृतिज्ञानं स्कन्दस्य च निषेधनम् ।
अपस्मारशकुन्योश्च रेवत्याश्च पुनः पृथक् ॥
पूतनायास्तथान्धाया मक्षिका शीतपूतना ।
नैगमेयचिकित्सा च ग्रहोत्पत्तिः सयोनिजा ॥
कौमारतन्त्रमित्येतत् शारीरेषु प्रकीर्त्तितम् ॥"

एतेषां विवरणन्तु बालग्रहशब्दे द्रष्टव्यम् ॥)

बालतृणं, क्ली, (बालं नवजातं तृणम् ।) नवतृणम् । तत्पर्य्यायः । शष्पम् २ । इत्यमरः ।२।४।२६७ ॥ (यथा, रघौ २।२६ श्लोकटीकायां मल्लिनाथः । गङ्गायाः प्रपातस्तस्यान्ते समीपे विरूढ़ानि जातानि शष्पाणि बालतृणानि यस्मिन् तत् ॥")

बालदलकः, पुं, (बालानि दलानीव दलानि यस्य । यद्वा बाल इव क्षुद्रं दलं यस्य । ततः स्वार्थे कन् ।) खदिरवृक्षः । इत्यमरटीकायां भरतः ॥

बालधिः, पुं, (बालाः केशाः धीयन्तेऽत्र । बाल + धा + कि ।) केशयुक्तलाङ्गूलम् । इत्यमरः ।२।८ ५० ॥ (यथा, किराते । १२ । ४७ ।

"चमरीगणैः शिवबलस्य
बलवति भयेऽप्युपस्थिते ।
वंशवितति विषक्तपृथु-
प्रियबालबालधिभिराददे धृतिः ॥")

बालपत्रः, पुं, (बाल इव क्षुद्रं पत्रं यस्य ।) खदिरवृक्षः । इत्यमरटीकायां भरतः ॥ यवासः । इति राजनिर्घण्टः ॥ (बालं पत्रमिति विग्रहे ।) क्ली । नूतनपर्णम् ॥ (यथास्य पर्य्यायः ॥